वैयाकरणसिद्धान्तकौमुदी

अजन्तपुँल्लिङ्गप्रकरणम् (१८)

२३.०२.२०११

पुनरावर्तनम्

- इकारान्तः पुँल्लिङ्गः सखिशब्दः ।
- सुप्रत्यये परे
  - ‘अनङ् सौ’ इति अनङादेशः
  - ‘सर्वनामस्थाने चासम्बुद्धौ’ इति उपधादीर्घः
  - ‘हल्ङ्याब्भ्यो दीर्घात्…’ इति सुलोपः
  - ‘नलोपः प्रातिपदिकान्तस्य’ इति नलोपः
- सखा
- सम्बुद्धौ अनङादेशो न । गुण-सम्बुद्धिलोपौ । हे सखे ।

पुनरावर्तनम्

- सर्वनामस्थानेषु परेषु
  - ‘सख्युरसम्बुद्धौ’ इति णिद्वद्भावः
  - ‘अचो ञ्णिति’ इति वृद्धिः
  - ‘एचोऽयवायावः’ इत्यायादेशः
- सखायौ
- सखायः
- सखायम्
- सखायौ

- सखि (शस्) अस्
- सखीस् (‘प्रथमयोः पूर्वसवर्णः’ – ६.१.१०२ – इति पूर्वसवर्णदीर्घः)
- सखीन्   (‘तस्माच्छसो नः पुंसि’ – ६.१.१०३ – इति नत्वम्)

- सखि आ
- सख्या (‘इको यणचि’ – ६.१.७७)
- सख्ये   सखिभ्याम्   सखिभ्यः

- सखि (ङसि) अस्
- सख्यस् (‘इको यणचि’ – ६.१.७७)

२५५. ख्यत्यात्परस्य (६.१.११२)

- पदद्वयम् । ख्यत्यात्, परस्य ।
- ‘एङः पदान्तादति’ (६.१.१०९) इत्यतः ‘अति’ इति, ‘ङसिङसोश्च’ (६.१.११०) इति, ‘ऋत उत्’ (६.१.१११) इत्यतः ‘उत्’ इति च अनुवर्तते ।
- खि-खी इत्यनयोः, ति-ती इत्यनयोश्च कृतयणादेशयोः ख्य-त्य इति निर्देशः ।
- खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोः अतः उत् स्यात् ।
- सख्यस्
- सख्युस् (‘ख्यत्यात्परस्य’ – इति उत्वम्)
- सख्युर्
- सख्युः

- सख्योः
- सखीनाम्

- सखि (ङि) इ

२५६. औत् (७.३.११८)

- एकपदात्मकं सूत्रम् ।
- 'ङेराम्नद्याम्नीभ्यः' (७.३.११६) इत्यतः 'ङेः' इति, 'इदुद्भ्याम्' (७.३.११७) इति च अनुवर्तते ।
- इदुद्भ्यां परस्य ङेः औत् स्यात् ।
- उकारानुवृत्तिः उत्तरार्था ।
- सखि इ
- सखि औ ('औत्' इति ङेः औकारादेशः)
- सख्यौ ('इको यणचि' – ६.१.७७)
- शेषं हरिवत्

- इकारान्तः पुँल्लिङ्गः ‘सखि’ शब्दः ।
- ‘शेषो घि असखि’ (१.४.७) इत्युक्तत्वात् सखिशब्दस्य घिसंज्ञा नास्ति । तत्प्रयुक्तानि कार्याणि न भवन्ति ।
  - ‘आङो नाऽस्त्रियाम्’ – इति टायाः नाभावः
  - ‘घेर्ङिति’ – इति ङित्सु प्रत्ययेषु परेषु गुणः
  - ‘अच्च घेः’ – इति प्रकृतेः अत्त्वम्
- किञ्च, सखिशब्दस्यैव कानिचन विशिष्टानि कार्याणि उच्यन्ते –
  - ‘अनङ् सौ’ – इति सुप्रत्यये परे अनङ्-आदेशः
  - ‘सख्युरसम्बुद्धौ’ – इति सर्वनामस्थानेषु परेषु णिद्वद्भावः

अन्यानि विशिष्टसूत्राणि

- सर्वनामस्थाने चासम्बुद्धौ
- हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्
- अचो ञ्णिति
- ख्यत्यात्परस्य
- औत्

इकारान्तः पुँल्लिङ्गः सखिशब्दः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमाविभक्तिः	सखा	सखायौ	सखायः
सम्बोधनप्रथमाविभक्तिः	हे सखे	हे सखायौ	हे सखायः
द्वितीयाविभक्तिः	सखायम्	सखायौ	सखीन्
तृतीयाविभक्तिः	सख्या	सखिभ्याम्	सखिभिः
चतुर्थीविभक्तिः	सख्ये	सखिभ्याम्	सखिभ्यः
पञ्चमीविभक्तिः	सख्युः	सखिभ्याम्	सखिभ्यः
षष्ठीविभक्तिः	सख्युः	सख्योः	सखीनाम्
सप्तमीविभक्तिः	सख्यौ	सख्योः	सखिषु

- शोभनः सखा सुसखा । सुसखायौ । सुसखायः ।
- अनङ्-णिद्वद्भावयोः आङ्गत्वात् तदन्तेऽपि प्रवृत्तिः ।
- ‘पदाङ्गाधिकारे तस्य च तदन्तस्य च’ (प) ।
- समुदायस्य सखिरूपत्वाभावाद् ‘असखि’ इति निषेध-अप्रवृत्तेः घिसंज्ञा ।
- सुसखिना । सुसखये ।
- ङसिङसोः गुणे कृते कृतयणादेशत्वाभावात् ‘ख्यत्यात्परस्य’ इति उत्वं न ।
- सुसखेः । सुसखौ इत्यादि ।
- एवम् अतिशयितः सखा अतिसखा ।

इकारान्तः पुँल्लिङ्गः सुसखिशब्दः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमाविभक्तिः	सुसखा	सुसखायौ	सुसखायः
सम्बोधनप्रथमाविभक्तिः	हे सुसखे	हे सुसखायौ	हे सुसखायः
द्वितीयाविभक्तिः	सुसखायम्	सुसखायौ	सुसखीन्
तृतीयाविभक्तिः	सुसखिना	सुसखिभ्याम्	सुसखिभिः
चतुर्थीविभक्तिः	सुसखये	सुसखिभ्याम्	सुसखिभ्यः
पञ्चमीविभक्तिः	सुसखेः	सुसखिभ्याम्	सुसखिभ्यः
षष्ठीविभक्तिः	सुसखेः	सुसख्योः	सुसखीनाम्
सप्तमीविभक्तिः	सुसखौ	सुसख्योः	सुसखिषु

‘परमः सखा यस्य’ इति विग्रहे परमसखा परमसखायौ इत्यादि ।

गौणत्वेऽपि अनङ्ङ्गिणत्त्वे प्रवर्तते ।

- सखीम् अतिक्रान्तः अतिसखिः ।
- लिङ्गविशिष्टपरिभाषायाः अनित्यत्वात् न टच् ।
- 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' (प)
- हरिवत् ।
- इह अनङ्-णित्त्वे न भवतः । 'गोस्त्रियोः..' इति उपसर्जनत्वेन सखिशब्दस्य लाक्षणिकत्वात् ।
- 'लक्षण-प्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' (प)

इकारान्तः पुँल्लिङ्गः अतिसखिशब्दः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमाविभक्तिः	अतिसखिः	अतिसखी	अतिसखयः
सम्बोधनप्रथमाविभक्तिः	हे अतिसखे	हे अतिसखी	हे अतिसखयः
द्वितीयाविभक्तिः	अतिसखिम्	अतिसखी	अतिसखीन्
तृतीयाविभक्तिः	अतिसखिना	अतिसखिभ्याम्	अतिसखिभिः
चतुर्थीविभक्तिः	अतिसखये	अतिसखिभ्याम्	अतिसखिभ्यः
पञ्चमीविभक्तिः	अतिसखेः	अतिसखिभ्याम्	अतिसखिभ्यः
षष्ठीविभक्तिः	अतिसखेः	अतिसख्योः	अतिसखीनाम्
सप्तमीविभक्तिः	अतिसखौ	अतिसख्योः	अतिसखिषु

भिन्नेषु समासेषु सखिशब्दस्य रूपाणि

- प्राधान्ये
  - तत्पुरुषे
    - कृष्णस्य सखा – कृष्णसखः । 'राजाहःसखिभ्यष्टच्' (५.४.९१) इति तत्पुरुषे समासान्तः टच् प्रत्ययः । अकारान्तत्वं सम्पद्यते । रामशब्दवद् रूपाणि (घिसंज्ञा नास्ति, अनङ्-णिद्वद्भावौ अपि न स्तः)
  - तत्पुरुषे (समासान्ताभावे) द्वन्द्वे च
    - 'न पूजनात्' (५.४.६९) इति निषेधात् पूजनार्थे सु-अति इत्येतयोः उपसर्गयोः विषये समासान्तप्रत्ययो न भवति ।
    - शोभनः सखा – सुसखा । अतिशयितः सखा – अतिसखा । सर्वनामस्थानेषु सखिशब्दवत्, ततः हरिशब्दवद् रूपाणि । (अनङ्-णिद्वद्भावौ भवतः । समुदायस्य 'सखि'रूपत्वाभावात् घिसंज्ञा अपि अस्ति ।

गौणत्वे

बहुव्रीहौ

- तत्पुरुषत्वाभावात् न टच् ।
- गौणत्वेऽपि अनङ्-णित्त्वे भवतः । घिसंज्ञा अपि भवति ।
- परमः सखा यस्य सः – परमसखा, परमसखायौ...
- स्वादिपञ्चके सखिवत्, ततः हरिवद् रूपाणि ।

तत्पुरुषे

- सखायम् अतिक्रान्तः – अतिसखः? टच्-समासान्तः ।
- अकारान्तः । रामवद् रूपाणि ।

लाक्षणिकत्वे

- सखीम् अतिक्रान्तः – 'अति सखी' इति स्थिते 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वः । 'अतिसखि' इति प्रातिपदिकम् ।
- टच्-समासान्तः न भवति, 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषायाः अनित्यत्वात् ।
- अनङ्-णित्त्वे अपि न भवतः, 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' इति परिभाषायाः सत्त्वात् ।
- घिसंज्ञा तु भवति । हरिशब्दवद् रूपाणि ।